1920

॥ [illegible]मौलीश्वरौ विजयेतेतराम् ॥

अथ पुरुषार्थमीमांसा ।

श्रीमत्परमहंसपरिव्राजकाचार्य्यादिविरु-
दावलिमण्डितपश्चिमाम्नाय-
श्रीशारदापीठाधीश्वरश्री-
शङ्क[illegible]त्रयतीर्थ-
स्वामिचरणकमल-
भृङ्गायमाण-
श्री[illegible]तीर्थ-
स्वामिचरणैर्निर्मिता ।

सा च कलिकातानिवासिश्रेष्ठिप्रवर
धर्मरत्न शिवकृष्णगुप्तेन धर्मार्थ
पद्रव्यव्ययेन मद्राप्य प्रकाशिता ।

वैदि[illegible]

हेतुवादः ।

अयं ग्रन्थः सरलेनपथाकाण्डत्रयावबोधाय गुरोः कर्तव्यप्रदर्शनाय चारचितो जगद्गुरुपदाधिरूढेन पश्चिमाम्नायशारदापीठाधीशेन ।

पूर्वमपूर्णोऽपि सोऽसंशोध्य मुद्रापितो बङ्गदेशे वेदान्तवाचस्पतिना रायबहादुरयदुनाथमुजुमदारेण हिन्दुपत्रिकायाम् । इदानीं संशोधितः परिपूरितश्च बीकानेरनिवासिमाहेश्वरीवैश्यज्ञातेय शिवकृष्णेनधर्मार्थं स्वद्रव्यव्ययेन पण्डितप्रवरामरचन्द्रशर्मणउपदेशेन मुद्रापितः।स्वीकृत्य चैनं पुण्यफलभागिनं श्रेष्ठिनंभवन्तो करिष्यन्ति ।

रजस्तमोरहिता विद्वांसो दृष्टिगोचरमेनं समानीय ग्रन्थं चोक्तानुक्तदुरुक्तचिन्ताफलमावेदयिष्यन्ति जगतामुपकाराय । भविष्यति परिश्रमःसफलस्तेन त्वाचार्याणाम् ।

विद्वद्भिस्समादृतः सर्वैरपि स्वीकार्यो भवेदेवेति मत्वा प्रार्थयते यथायथं विबुधाग्रेसरान् सप्रणामम् ।

भाद्रशुक्ला पूर्णिमा
वि० सं० १९७७

श्रीमतामनुग्रहभाजनम्
विद्यारत्न पं०
हरिप्रसाद शर्म्मा,
अजयमेरुवास्तव्यः

॥ श्रीशारदाम्बाचन्द्रमौलीश्वरौ विजयेतेतराम् ॥

अथ पुरुषार्थमीमांसा ।

१ अथातः पुरुषार्थ जिज्ञासा ।

२ पुरुषार्थः सुखं नित्यं निरतिशयञ्च ।

३ अपरिच्छिन्नेनाप्यते ।

४ अपरिच्छेद्यत्वमद्वितीयत्वात् ।

५ भूमाततः ।

६ अनुभूयते नारदादिभिः ।

७ ब्रह्मी भावश्च श्रुतेः ।

८ निर्दोषं समं च ब्रह्म ।

९ दोषः प्रज्ञापराधः ।

१० ततोऽन्तर्लसाक्षिन्यग् ।

११ द्वेधारजस्तमश्च तदल्पानल्पत्वाभ्याम् ।

१२ कामादयो रजसः उदयात् ।

१३ निद्रादयोऽन्यस्य ।

१४ ततो निकृष्टम् ।

१५ तस्यलोपः क्रमश इतराधिक्ये ।

१६ आधिक्यमेवमुचित व्यवस्थानादाहारादीनाम् ।

१७ शनैस्त्यागोऽहितस्य मात्रया ।

१८ ग्रहणं च हितस्य ।

१९ बुद्धिश्चैवं त्यागसंग्रहस्थैर्ये ।

२० एवं क्रम आभीष्टसिद्धेः ।

२१ सत्वात्तस्य च ।

२२ ज्ञानादयश्च ।

२३ तत्रापि पूर्ववद् व्यवस्था ।

२४ ऋतम्भरा ततः प्रज्ञा ।

२५ यतस्तत् काशते ।

२६ तद् विवर्धकानि,सत्कर्मध्यानस्वाध्यायादीनि ।

२७ परार्थानि स्ववर्णाश्रमोचितानि सत्कर्माणि ।

२८ ब्रह्मार्पणान्यपि ।

२९ अतः कर्मावगति रावश्यकी ।

३० देशकालादिभिः फलभेदो यतः ।

३१ अप्रमादादिनैवलाभः सर्वत्र ।

३२ ध्रु्प्रादे रपेक्षापि ।

३३ ध्यानञ्चात्मविषयं ज्ञानादनु ।

३४ आत्मा पुरुषः ।

३५ शुद्धो बुद्धो हि ।

३६ सर्वात्मविषयमपि ।

३७ स हि विराट् ।

३८ हिरण्यगर्भश्च ।

३९ ईश्वरोऽपि ।

४० आत्मानात्म सर्वात्मज्ञानापेक्षाचातः ।

४१ अनात्माप्रकृतिः ।

४२ जगच्च तद्विकारत्वात् ।

४३ चित्तवृत्ति निरोधो ज्ञानसाधनम् ।

४४ सर्वज्ञे चित्तप्रणिधानं पतञ्जलेः ।

४५ सद्भावनोपचयः कपिलस्य ।

४६ आत्मसंस्थंमनः कणादस्य ।

४७ आत्मगृहीति र्व्यासस्य ।

४८ अहिंसादयःसमुच्चिता मनोः ।

४९ तत्वस्मृतिबलमात्रेयस्य ।

५० अध्यात्मविध्युपायो गौतमस्य ।

५१ धर्मानुष्ठानं जैमिनेः ।

५२ विद्यासमुत्थानं तान्त्रिकाणाम् ।

५३ सदाचरणं बृहस्पतेः ।

५४ रत्नत्रयशरणं बौद्धानाम् ।

५५ कर्मक्षपणं वीरस्य ।

५६ सत्कर्मवाक्चिन्ता जरदुष्ट्रस्य ।

५७ नियमाधीनता मूषस्य ।

५८ बलिप्रदानं विधिनाऽसुरस्य ।

५९ भूतदया क्रीष्टस्य ।

६० गुरोराज्ञानुवर्तित्वं महामदस्य ।

६१ स्वसामर्थ्यविकाशो राहसिकानाम् ।

६२ अभ्यासवैराग्याभ्यां तत्सिद्धिः ।

६३ विवेकानन्तर्य मपेक्ष्यते च ।

६४ शमादिकमावश्यकम् ।

६५ इच्छादार्ढ्ये प्रयत्नारम्भः ।

६६ अधिमात्रस्य फलं झटिति ।

६७ तीव्रसंवेगेऽत्यासन्नं च ।

६८ दीर्घकालादि मुख्याक्रमम् ।

६९ योग्यो यत्नोऽभ्यासः ।

७० आवृत्ति आसकृद्यथोपदेशम् ।

७१ आसीनः सुखम् ।

७२ ध्यानाच्च ।

७३ अचलत्वापेक्षा च ।

७४ यत्रैकाग्रता हि ।

७५ आप्रायणात् ।

७६ यावता फलंवा ।

७७ तत्साधनेतरोपेक्षैव वैराग्यम् ।

७८ मैत्र्यादि तदुपकारि ।

७९ क्रियायोगोऽपि ।

८० सर्वज्ञ आगमः ।

८१ आचार्यश्च ।

८२ अनाद्यवच्छिन्नपरम्पराऽतः ।

८३ स्वाध्यायश्चागामिकोऽपि ।

८४ स्वरार्थज्ञानभावनापूर्वश्चेत्सफलः ।

८५ गुणाविर्भावः सम्यग्भावनाऽतः

८६ दोषतिरोभावश्च ।

८७ स्वरसाम्यवदपार्थक्यदर्शनं समत्त्वम् ।

८८ पार्थक्यं भेदोऽपूर्तेः ।

८९ गतिमतिकृतिप्रकृतिवैचित्र्याल्लक्ष्यते ।

९० अपूर्तिश्चावच्छेदात् ।

९१ स्वगतादिश्च ।

९२ अध्यासात् ।

९३ अज्ञानात् सः ।

९४ अविद्याचापि ।

९५ अनादिश्च बीजाङ्कुरवत् संस्कारप्रवाहात् ।

९६ ततः संसारः ।

९७ अतो दुःखमेव विवेकिनाम् ।

९८ ज्ञानात्तन्निवृत्तिः ।

९९ विद्ययालभ्यते ।

१०० ततः सुखं पूर्तेः ।

१०१ यथार्था परिपूर्तिर्ब्रह्म ।

१०२ आत्मानात्म सर्वात्मसमाहारत्वाच्च ।

१०३ जन्माद्यस्ययतश्चेति पाराशर्य्यः ।

१०४ शारीयोनित्वमप्यस्य ।

१०५ सत्समाहारः सार्थ्येनैव ।

१०६ निर्दोषत्वाच्च ।

१०७ एकोऽद्वितीयः सँश्चैव ।

१०८ तदनुभूतिरधिष्ठानव्याप्तिविज्ञानात् ।

१०९ परानन्दानुसरणात् ।

११० सदखंडानन्तैक्यबोधात् ।

१११ निष्कलत्वानुभवात् ।

११२ अनहंभावात् ।

११३ सर्वस्मिन्नहं भावात् ।

११४ सार्वात्म्यानुभूतेः ।

११५ अस्पर्शयोगादपि ।

११६ निरालम्बनाच्च ।

११७ कोशविवेकात् ।

११८ देहविचारात् ।

११९ अवस्थापरीक्षेः ।

१२० दहर विद्यादिभिर्वा ।

१२१ सर्वज्ञात्मभावात् पतञ्जलेः ।

१२२ प्रकृतिदर्शनात् कपिलस्य ।

१२३ वैदिक धर्मानुष्ठानात् कणादस्य ।
१२४ मिथ्याज्ञाननिवृत्ति रक्षपादस्य ।
१२५ यावज्जीवं धर्माचरणाद्यथाधिकारं जैमिनेः ।
१२६ सर्वसेवाद्याज्ञिकानाम् ।
१२७ सर्वसंस्कारान्ते गौतमस्य ।
१२८ सम्यग्ध्यानपरिपाकान्मनोः ।
१२९ चरमसंन्यासादात्रेयस्य ।
१३० ज्ञानकर्मभक्तिसमुच्चयाद् भागवतानाम् ।
१३१ देवताभावात् पौराणिकानाम् ।
१३२ सौरादीनाञ्चैवम् ।
१३३ विद्यासामर्थ्याद् व्यासस्य ।
१३४ वृत्तिनाशादद्वैतिनाम् ।
१३५ शेषशेषिभावाद् विष्वक्सेनस्य ।
१३६ पुष्टिपुष्टेर्वल्लभस्य ।
१३७ पराभक्तेर्गौराङ्गस्य ।
१३८ विष्णोरनुग्रहान्मध्वस्य ।
१३९ रामप्रपत्ते रामानन्दस्य ।
१४० तत्स्मरणादेव रामस्नेहिनाम् ।

१४१ गोपालाराधनाग्निम्बादित्यस्य ।
१४२ ज्योतिर्दर्शनात्कवीरस्य ।
१४३ भेदपरिहाराज्ञानकस्य ।
१४४ लिङ्गधृतेर्वृषभस्य ।
१४५ ध्येयाविर्भावात् स्वस्मिन् शाक्तानाम् ।
१४६ शक्तिपातादेव तान्त्रिकाणाम् ।
१४७ भैरवावेशात् षडर्धवादिनाम् ।
१४८ शरीरपातान्तेगुरोः ।
१४९ केवलज्ञानात् वीरस्य ।
१५० निर्वाणाद् बुद्धस्य ।
१५१ जगदुपकारेण वृत्तिशून्यतया च नागार्जुनस्य ।
१५२ देहलोहसिद्धिभ्यां रसवादिनाम् ।
१५३ देवतातोषादसुरस्य ।
१५४ द्योः प्रसादान्मूसस्य ।
१५५ क्रीष्टानुग्रहात् क्रीष्टीयानाम् ।
१५६ विवेकमन्वीशेश सेवया जरदुष्ट्रस्य ।
१५७ अल्लालम्बान्महामदस्य ।
१५८ अहंगृहीतेः सुफीनाम् ।

१५९ परिपूर्णभावावेशाद्गहासिकानाम् ।

१६० सर्वभावेन शरणवरणात् सर्वात्मनः ।

१६१ अन्तर्यामिनो वा ।

१६२ आवरणनाशस्ततः ।

१६३ आवरणं ज्ञानाच्छादकम् ।

१६४ विक्षेपनाशे सत्येव ज्ञानयोगाधिकारः ।

१६५ विक्षेपो विविधवृत्युद्भवः ।

१६६ ततोदृष्टिसृष्टिः ।

१६७ सृष्टिदृष्टिर्वा ।

१६८ सैव संसारश्च ।

१६९ तदर्थमुपासनायोगः ।

१७० आराधनाभक्तियोगभेदात्त्रिधा ।

१७१ प्रथमा नाना ।

१७२ श्रौती स्मार्ती पौराणिकी तान्त्रिकी भेदात् ।

१७३ अधिकारिभेदाच्च ।

१७४ अहंप्रतीकग्रहाख्यां श्रौती द्वेधा ।

१७५ प्रतीक्यां सिद्धायामहंग्रहाधिकारः ।

१७६ अतो विक्षेपतनुत्वम् ।

१७७ निरालम्बा स्थितिश्च ।

१७८ यथाप्रकृत्यादि प्रातीकी ।

१७९ तत्र सवितुः प्राथम्यम् ।

१८० अग्नेरपि ।

१८१ कल्पेषु विस्तरः ।

१८२ अन्तेऽग्नेः पूष्णोवा ।

१८३ सवितुर्वा ।

१८४ अन्या अपि ।

१८५ उपनिषत्सु ताः ।

१८६ स्मार्त्यामपि पूर्ववत् ।

१८७ शिवादीनां मुख्येति बौधायनः ।

१८८ तत्रापि हरहर्य्योः प्राधान्यम् ।

१८९ ग्रहादीनामपि कुत्रचित् ।

१९० पितृणाञ्च ।

१९१ तद् विस्तरो गृह्येषु ।

१९२ पौराणिकी वहुधा ।

१९३ देशजातिकुलानुरोधात् ।

१९४ क्वचित् कालबलात् ।

१९५ संसर्गात् परिस्थितेश्च ।

१९६ व्रतादिरूपा अपि ।

१९७ रीतिर्भिन्ना ।

१९८ पञ्चजनाधिकारत्वात् ।

१९९ ज्ञातव्यंतु पूर्ववदेवाऽत्र ।

२०० तान्त्रिकी पञ्चायतन प्राधान्येन ।

२०१ जैनादीनामत्र समावेशः ।

२०२ रहस्यतमेषु त्वहंग्रहस्यैवमुख्यत्वम् ।

२०३ विस्तरस् तन्त्ररहस्ये ।

२०४ उपास्यगुणाविर्भाव उपासके तत्फलम्।

२०५ भक्तियोगे भावस्य प्राधान्यम् ।

२०६ इष्टे परप्रेमैव भक्तिः सर्वेषाम् ।

२०७ परानुरक्तिः शाण्डिल्यस्य ।

२०८ यतः प्रेमैव सत्कं निरुपाधिकञ्चेत् ।

२०९ अनिर्वचनीयमप्यनुभवगम्यम् ।

२१० रोमाञ्चादि सात्विकभावालिङ्गम् ।

२११ चित्तशुद्धौ स्वयमुत्पद्यते ।

२१२ कण्टकरहितत्वार्द्रताभ्यां शुद्धिः।

२१३ आसुरीसम्पत् कण्टकानि ।

२१४ दैवीसम्पदात्तच्छिरसनम् ।

२१५ स्वपरयोरुच्चावचभावेन ज्ञानमार्द्रता ।

२१६ स्वपरस्वरूपबोधतः ।

२१७ ततः परमस्नेहबीजं प्रकटयति ।

२१८ गुणपक्षपातोऽङ्कुर उद्भवति ।

२१९ ततो न तन्नाशः ।

२२० प्रतिबन्धाद् वृद्धिरोधः ।

२२१ न तेन रसास्वादः ।

२२२ ततोऽपर्य्याप्तिः ।

२२३ सैवार्तिः ।

२२४ ततःकृपा ।

२२५ प्रतिबन्धनिवृत्ति स्तामनु ।

२२६ शरणागतितोऽपि

२२७ तारकाद्वन्द्वासक्त्युत्कटानुरागा मुग्धमध्य-
प्रौढावस्थाभिधानाः ।

२२८ तिसृषुदशानामन्तर्भावः

२२९ नवानामपि ।

२३० एकादशानाञ्च ।

२३१ भावनास्थैर्यं चिरकालीनं विप्रलम्भान्ते सिद्ध्यति ।

२३२ ततोमध्यप्रौढयोर्विप्रलम्भानुभवः ।

२३३ न स संयोगं विना ।

२३४ अतो मुग्धायां तदपेक्षा प्रकटा ।

२३५ सूक्ष्मभावेन चावस्थितिरन्यस्य ।

२३६ तेनैव तापः ।

२३७ नास्वादं विना तदुत्पत्तिः ।

२३८ तद्विना रसद्रवो नैव ।

२३९ तस्मिन् रसानुभवः प्रेम समाधिः ।

२४० रसो वा इति श्रुतेः ।

२४१ तदर्थं रसाविर्भावयोजना ।

२४२ अत्र मुख्यं साहाय्यं स्थायिभावस्य ।

२४३ सात्विकभावस्यापि ।

२४४ व्यभिचारिभावादीनां गौणम् ।

२४५ तथाप्यपेक्षातु ।

२४६ भोक्तृभोग्यौ परेशानौ केषाञ्चित् ।

२४७ अतो नायिकात्वमात्मनि रहसिकानाम् ।

२४८ नायकत्वमीशे च ।

२४९ शिष्टं रहस्यतन्त्रात् ।

२५० द्वैतयोरद्वैतमेतदेव प्रत्यक्षम् ।

२५१ गार्हस्थ्येऽपि स्यात् ।

२५२ सगुणयोरेव ।

२५३ ततस्तस्मिन् द्वयोर्वृत्तीनामप्यैकात्म्यम् ।

२५४ अन्तः स्वभान विस्मरणमपि ।

२५५ तदा प्रियतमरूपेण जगदनुभवति ।

२५६ यतः स सर्वरूपः ।

२५७ सर्वान्तर्याम्यपि ।

२५८ तथापि साकारोऽनुभूयते ।

२५९ क्रमशः श्रद्धाप्रहामिर्वेदैकाश्रयैषणात्यागस-
मुच्चयात् धन्यः सकालो धन्या गुरुचरणपांसव
इति स्वत एवोद्घोषकोऽलौकिकोऽनुभवः ।

२६० आनन्दो ब्रह्मेति श्रुतेः ।

२६१ एवं परिपाकाच्चित्तलयादीनि ।

२६२ योगश्चतुर्धा ।

२६३ राजमन्त्रहठलयभेदात् ।

२६४ राजयोगः पञ्चदशाङ्गः शंकरस्य ।

२६५ सर्वं ब्रह्मेति यमः ।

२६६ परानन्दस्मृतिर्नियमः ।

२६७ चिदवलोकनात् रूपस्त्यागस्त्यागः ।

२६८ मनोऽगोचरध्यानं मौनम् ।

२६९ ब्रह्मण्याप्तिर्देशः ।

२७० कालाऽनवच्छिन्नत्वं कालः ।

२७१ सुखं ब्रह्मचिन्तनमासनम् ।

२७२ सर्वभूतमूलचिन्तनं मूलबन्धः

२७३ समे लयः साम्यम् ।

२७४ ब्रह्ममयदर्शनं दृष्टिः ।

२७५ ब्रह्मभावनाद् वृत्तिनिरोधः प्राणायामः ।

२७६ तदर्थे रेचकादीनि ।

२७७ प्रपञ्च निषेधोरेचकः ।

२७८ ब्रह्मास्मीति वृत्तिः पूरकः ।

२७९ तद्वृत्तिनैश्चल्यं कुम्भकः ।

२८० मनसश्चितिमज्जनं प्रत्याहारः ।

२८१ तस्य तन्त्रधारणाधारणा ।

२८२ ब्रह्मास्मीतिवृत्त्या निरालम्बास्थितिर्ध्यानम् ।

२८३ तस्यापि विस्मरणं समाधिः ।

२८४ अभ्यासेनैव फलयोगः ।

२८५ अननुसंधानालस्यभोगेप्सालयतमो विक्षेप-
रसास्वादशून्यतादीनि विघ्नानि ।

२८६ विक्षेपस्योपायेन शमनम् ।

२८७ लयस्य सुप्रसन्नतया ।

२८८ बोधेन वा ।

२८९ दुःखस्मृतेर्भोगेहा हानम् ।

२९० कषायस्य यत्नतः सम्पादनम् ।

२९१ रसास्वादे चासक्तिवर्जनम् ।

२९२ शेषेषु यथायोग्यम् ।

२९३ वैराग्यं चाभ्यासस्य सहकारि ।

२९४ सावधानताऽपेक्षा ।

२९५ तीव्रभावनया सिद्धिः ।

२९६ अनिर्वेदाच्च ।

२९७ पक्वकषायाणामेव ।

२९८ गुरुदेवभक्तानां हि ।

२९९ प्रज्ञया तेन निःसङ्गो निश्चलश्च ।

३०० तदामनोऽनिङ्गमनाभासं विज्ञपजयहीनञ्च ।

३०१ शेषमन्यत्र ।

३०२ सम्यज्ज्ञानावाप्ति रेवास्मात् ।

३०३ विधिनादीक्षितःकृतपुरश्चरणोमंत्रयोगाधिकारी

३०४ अरिषट्कजयपूर्वप्रवेशोऽस्मिन् ।

३०५ धैर्येण साकम् ।

३०६ अष्टावङ्गानि हठवत् ।

३०७ सत्याऽहिंसासमताधृत्यस्तेयक्षमार्जववैरा-
ग्यानि यमाः ।

३०८ स्वाध्यायतपोऽर्चाव्रतसन्तोषशौचा नियमाः ।

३०९ आसनान्यनेकानि ।

३१० योनिमुद्रासनंश्रेष्ठम् ।

३११ सिद्धासनमपि ।

३१२ वायुबीजेनेडया पूरकः शोषकः ।

३१३ पिङ्गलयाग्निबीजेन रेचको दाहकः ।

३१४ सुधाबीजेन पूरकादित्रयम् ।

३१५ प्राणायामः सः ।

३१६ मात्रादिकं हठवत् ।

३१७ कुम्भ्यादिकमपि ।

३१८ हितमितपथ्यसात्विकाहारस्यकालदेशरह-स्युपटाजिनकुशोत्तरमधिष्ठितस्य ।

३१९ चित्तात्म्यैकभूतप्राणसंहारः प्रत्याहारः ।

३२० तस्यैव स्थानस्थापनकर्म धारणा ।

३२१ अङ्गुष्ठादीनि स्थानानि ।

३२२ उत्क्रान्तिगतागतपरकायप्रवेशोपयोगीनि ।

३२३ कराठादिषु बीजपूर्व भूतधारणाः ।

३२४ आत्मनः सारूप्यपूर्व हि ।

३२५ मनसि देवताभावो ध्यानम् ।

३२६ सत्तामात्रस्थितिः समाधिः ।

३२७ कम्पपुलकानन्दवैमल्यस्थैर्यलाघवसकलप्र-काशचिह्नाः सिद्धेः सूचकाः ।

३२८ त्रैकाल्यज्ञानेहाक्रन्दतोमरप्रोधमनो[illegible]ताना-दीसंक्रमणवाक्सिद्धिपरकायप्रवेशज्योतिः-प्रकाशनानि प्रत्ययाः ।

३२९ अणिमादिकं योगैश्वर्य्यम् ।

३३० कुण्डलीचालनषट्चक्रवेधाजयाजयसूतशु-
द्ध्यादीन्युपाङ्गानि ।

३३१ मंत्रदेवतात्मगुरुयंत्रजगतामैक्यानुभवान्महा-
ह्रदनिमज्जनं फलम् ।

३३२ मनुष्यमात्रस्यैवाधिकारो हठयोगे ।

३३३ मठवास एवात्रापेक्षितः ।

३३४ युक्ताहारविहारादयश्च ।

३३५ अत्याहारादीनि त्याज्यानि ।

३३६ उत्साहादेः कार्य्यसिद्धिः ।

३३७ अङ्गान्यष्टौ यमादीनि ।

३३८ अहिंसादयो यमा दश ।

३३९ नियमाश्च शौचादयः ।

३४० आसनानि पद्मादीनि स्थिरसुखानि बहूनि ।

३४१ मुख्यानितु सिद्धादीनि गुरुमुखैकवेद्यानि-
सफलानि हि ।

३४२ अभ्यास एव सिद्धिकारणं वैराग्यपूर्वश्चेत् ।

३४३ प्राणायामो बन्धत्रयपूर्वः ।

३४४ तत्रेडया पूरकः प्रथमम् ।

३४५ पिङ्गलया रेचकश्चान्ते ।

३४६ मध्ये कुम्भकेन प्राणविधारणम् ।

३४७ यथाक्रममेकद्विचतुर्गुणाः कालःप्रत्येकम् ।

३४८ षोडशमात्रापूरकः प्राथमकल्पिकः ।

३४९ सुषुम्णायां प्राणस्थितिः सार्द्धद्विपलिका चेत्-
योग्यः ।

३५० ततो द्वादशगुणा चेत् प्रत्याहारः ।

३५१ धारणादयः क्रमेण द्वादशगुणोत्तराः ।

३५२ नाडीशुद्धा चेत्सुखेन सिद्धिः ।

३५३ तदर्थं धौत्यादीनि ।

३५४ चित्राःकुम्भकाश्चापि ।

३५५ कृशत्वादीनि सिद्धिलिङ्गानि ।

३५६ लघुत्वादीनि च श्रुतेः ।

३५७ कुण्डली चालनं चापि सिद्ध्युपयोगि ।

३५८ महामुद्रादिकं तत्राप्यपेक्षितम् ।

३५९ ततःप्रत्याहार इन्द्रियाकर्षकः ।

३६० धारणा देशबन्धश्चित्तस्य तदनु ।

३६१ प्रत्ययैकताननाध्यानं च क्रमेण तत्र ।

३६२ ततः समाधिः स्वस्वरूपस्थितिः ।

३६३ धारणाध्यानसमाधीनां एकत्रोपयोगः संयमः ।

३६४ तत्सिद्धेः कार्यसिद्धिः ।

३६५ ततस्तस्य सिद्धिषु विनियोगः ।

३६६ परं समाधावुपसर्गाः सिद्धयः ।

३६७ मोक्षप्रतिबन्धका व्युत्थापकत्वात् ।

३६८ स्वरूपप्रतिष्ठैव फलम् ।

३६९ ततः कालजयादीनि स्वयमेव ।

३७० शिघ्रं योगरहस्यात् ।

३७१ राजयोगाधिकारप्राप्तिश्चाभ्यतः ।

३७२ नादानुसंधानं लययोगः ।

३७३ मन्दप्रज्ञानान्त्वत्रैवाधिकारः ।

३७४ षण्मुखीमुद्रया रहसि ।

३७५ शाम्भव्यपि स्थिराभ्यासिनाम् ।

३७६ प्र[illegible]ाभ्यासिनां त्वष्टमीदृष्टिः ।

३७७ क्रमशोदशविधनादश्रवणं त्वतः ।

३७८ तत्रस्थूलं त्यक्त्वा सूक्ष्मं श्रयेत् ।

३७९ अन्तः सर्वसूक्ष्मे समाश्रिते परमानन्दः ।

३८० चित्तलयश्च ।

३८१ बाह्यशब्दाग्रहणं च ।

३८२ ततः समाधिः ।

३८३ सुकुमाराणामपि सुसुखा कर्तुम् ।

३८४ शेषं गुरुमुखैकवेद्यंहि ।

३८५ यतो न साकल्येन वक्तुं शक्यं केनचिदपि ।

३८६ यत्र कुत्रापि मनः स्पन्दरोधनमेव मुख्यम् ।

३८७ देवता प्रणिधानाच्चैतत् सकलं शीघ्रम् ।

३८८ अनुभवश्च यथाशास्त्रम् ।

३८९ मलनाशे सत्येवोपासनाधिकारः ।

३९० तदर्थं कर्मयोगः ।

३९१ अत्राधिकारभेदोह्यवश्यंभावि ।

३९२ प्रकृतिवैचित्र्यात् ।

३९३ प्रकृतिर्नवधा मनोः ।

३९४ षोडशधाऽऽत्रेयस्य ।

३९५ द्विधा श्रीकृष्णस्य ।

३९६ त्रिधा कपिलस्य ।

३९७ अतोवर्णानां व्यवस्था ।

३९८ तद्योग्यताया आश्रमरक्षणाच्च ।

३९९ वर्णत्वाविर्जन्मना ।

४०० संभावनात् ।

४०१ आनुवंशिकानां गुणानां दर्शनात् ।

४०२ दोषाणाञ्च ।

४०३ रोगाणामपि ।

४०४ आत्रेयोऽप्येवम् ।

४०५ श्रीकृष्णश्च ।

४०६ युक्तकर्मणोद्दीप्तिस्तस्य ।

४०७ तद्विहितकरणम् ।

४०८ अविहिताकरणाञ्च ।

४०९ गुणसंपदर्जनम् ।

४१० श्रुतञ्च ।

४११ समादरार्हञ्च समाहृतञ्चेत्सकलमेतत् ।

४१२ तद्विहीनस्य व्रात्यत्वम् ।

४१३ संस्कारहीनत्वादपि ।

४१४ संस्काराच्छ्रुतेन च तस्य वर्णे प्रवेशः ।

४१५ श्रुतगुणसंपदाविहीनस्य संस्कारयुक्तस्यव-
र्णाभिधानमेव ।

४१६ नार्थकरं तत् ।

४१७ कर्मयोगादनुभूतिस्तत्साम्यस्य ।

४१८ दोषापनुत्तिश्चापि ।

४१९ वर्णाश्रमोचितं कर्मैव सः निष्कामेन चेत् ।

४२० वर्णःसमाजाङ्गभूत उपकारकश्च ।

४२१ समष्टेश्च ।

४२२ चतुर्धा पुरुषाङ्गवत् ।

४२३ पञ्चधा वा श्रुतेः ।

४२४ संकराणामत्र समासः ।

४२५ वृत्तिपार्थक्यमेव ।

४२६ याजनादि ब्राह्मणस्य वृत्तिः ।

४२७ विजितादि क्षत्रियस्य ।

४२८ अभिषिक्तस्य प्रजापालनमधिकम् ।

४२९ कृष्यादि विशः ।

४३० सेवा शिल्पं च शूद्रस्य ।

४३१ मध्वादि निषादस्य ।

४३२ आश्रमो व्यष्टिसिद्ध्यै ।

४३३ व्यक्तियोग्यतैव सा ।

४३४ पुरुषावस्थाविशेषानुसारं चत्वारः ।

४३५ ब्रह्मचर्य्यगार्हस्थ्यवानप्रस्थसंन्यासा आश्रमाः ।

४३६ परः परः पूर्णोऽनुभूतेराधिक्यात् ।

४३७ शूद्रविट्क्षत्रब्राह्मणाः वर्णाः ।

४३८ परः परः श्रेष्ठः साद्गुण्यात् ।

४३९ शूद्रवर्जं द्विजा उपनयनाधिकारत्वात् ।

४४० द्विजानां चत्वार आश्रमाः ।

४४१ विशः सन्न्यासो नैकेषाम् ।

४४२ क्षत्रियस्य महाप्रस्थानमेवश्रुतेः ।

४४३ सदाचाराच्च ।

४४४ शूद्रस्य गार्हस्थ्यमेकमेव ।

४४५ पञ्चमहायज्ञाधिकारश्च ।

४४६ [illegible]लसीतायज्ञयोरपि ।

४४७ विद्याव्रतंसुश्रुतस्य ।

४४८ निषादस्य गार्हस्थ्यमेव ।

४४९ निषादस्थपते रौद्रेष्टेरपि ।

४५० आचार्यत्वंतुब्राह्मणस्य ।

४५१ उपदेष्टृत्वञ्च ।

४५२ प्रवक्तृत्वमपिसर्वत्र ।

४५३ व्यवस्थापकत्वं तु क्षत्रस्यैव ।

४५४ विभूतिभूतस्य क्वचिदाचार्यादित्वम् ।

४५५ शूद्रकल्पो जन्मना ।

४५६ वयोवृद्धिमनुपूर्वसंस्कारप्रादुर्भावः ।

४५७ शुभोऽशुभो वा ।

४५८ अशुभो नेष्टः ।

४५९ शास्त्रीयसंस्कारात्तन्नाशोऽपसरणं वा ।

४६० यतः शास्त्रीयस्य लौकिकात् प्राबल्यम् ।

४६१ गर्भाधानादयश्चसंस्काराः ।

४६२ अष्टाचत्वारिंशद्गौत्तमस्य ।

४६३ षोडश स्मार्तानाम् ।

४६४ पञ्चविंशद्वा ।

४६५ दशाप्येकेषाम् ।

४६६ विवाहान्ताः ।

४६७ स्मशानान्ताः केषांचित् ।

४६८ वानप्रस्थसंन्यासदीक्षे अपि ।

४६९ स्त्रीणामपि केचित् ।

४७० शूद्राणां कतिचिच्च ।

४७१ निषादस्यैक एव विवाहः ।

४७२ गुणाधानार्थम् ।

४७३ दोषनिवारणार्थञ्च ।

४७४ बैजगार्भैनोवारणार्थमपि ।

४७५ सत्वोद्बोधनमतः क्रमेण ।

४७६ उपशमश्चरजस्तमसोः ।

४७७ तैर्यथोचितं देहादीनां विकासः ।

४७८ चौलपर्यन्ते मुख्यशः ।

४७९ तेन विनयनयोग्यता च ।

४८० जीविकापरीक्षणमपि ।

४८१ आचारशिक्षारम्भश्च ।

४८२ [illegible]जत्वसंभावनापि ।

४८३ परमुपनयनमनुद्विजत्वम् ।

४८४ तत्स्थैर्यमाचारात् ।

४८५ आचारस्तु स्वस्ववर्णाश्रमोचितं कर्मैव ।

४८६ चारित्र्यादीनामत्रसमासः ।

४८७ तत्त्यागे पातित्यम् ।

४८८ अविहितकरणादपि ।

४८९ व्रात्यादिसंसर्गाच्च ।

४९० तच्छुद्धिस्तु प्रायश्चित्तेन ।

४९१ पश्चात्तापपूर्वञ्चेत् ।

४९२ शास्त्रात् ।

४९३ पर्षदुक्तं वा ।

४९४ देशादिविचारणापूर्वम् ।

४९५ प्रायश्चित्ततन्त्राद्विशेषः ।

४९६ ब्रह्मचर्यमुपनयनात् ।

४९७ विद्याध्ययनञ्च ।

४९८ तेन सामर्थ्योत्पादानं स्वाश्रयित्वसंपादनाय ।

४९९ व्यवहारनैपुण्यं च ।

५०० स्वकर्तव्यदार्ढ्यं हि ।

५०१ आत्मानात्मतत्त्वबोधं विना नैतत् ।

५०२ तदर्थं ब्रह्माचरणम् ।

५०३ प्रतिवेदं तानि भिन्नानि ।

५०४ अनुष्ठेयान्येव ।

५०५ न तेनविना वेदसंबोधः ।

५०६ साङ्गं चतुर्णां वेदानामध्ययनं श्रुतेः ।

५०७ त्रयाणां वा धीशक्तिदौर्बल्यात् ।

५०८ द्वयोरपि च ।

५०९ एकस्यात्यावश्यकम् ।

५१० चतुर्दशविद्यानां वा ।

५११ अष्टादशानां वा ।

५१२ नारदोक्तानां वा ।

५१३ सप्रयोगं सरहस्यञ्च ।

५१४ गोदानमध्ययनान्ते ।

५१५ ततः समावर्तनमाचार्यकुलात् ।

५१६ न तत्पूर्वम् ।

५१७ यावदध्ययनं ब्रह्मचर्यम् ।

५१८ अध्ययनाशक्तेरिच्छया नैष्ठिकम् ।

५१९ [illegible]धीनोयतस्ततः प्रसादः ।

५२० तदङ्गतयावर्तनात् ।

५२१ सवितुरग्नेः सायं प्रातरुपासनम् ।

५२२ गुरूणां च परिचर्या ।

५२३ अभेदभावनया त्रयाणां चात्मना श्रुतेः ।

५२४ एवमुपासनाप्रवेशः ।

५२५ तत इष्टादेरभेदानुभवो गुणाविर्भावश्चयथा-
यथम् ।

५२६ अनुभवयोग्यता च धियः ।

५२७ अन्तर्यामिन आदेशश्रवणम् ।

५२८ सत्यस्य प्रकाशः ।

५२९ शिक्षया दोषतिरोधानम् ।

५३० तैः स्वयोग्यतायानिश्चयः ।

५३१ तदनुवृत्तेः ।

५३२ शमादि शौर्यादि च ब्रह्मक्षत्रयोर्लक्षणे यथा-
संख्यम् ।

५३३ धर्माचरणायैव गार्हस्थ्यप्रवेशः ।

५३४ यथावर्णपत्नीपरिग्रहोगृहस्वीकारश्चतत्र ।

५३५ अध्यायोपयोगो तदर्थम् ।

५३६ कामार्थापि ।

५३७ यथाशास्त्रम् ।

५३८ अर्थाय च ।

५३९ अविरोधेनैव सर्वत्र परस्परम् ।

५४० सुप्रजोत्पादनं वंशवृद्ध्यनुशासना-
नुसारम् ।

५४१ नित्यानां समनुष्ठानं तस्य ।

५४२ संध्यादीनि च श्रुतेः ।

५४३ नैमित्तिकानाञ्च ।

५४४ संस्कारश्चयथायथम् ।

५४५ पाकहविर्यज्ञसोमसंस्था अपि ।

५४६ तैरपि संस्क्रियते ।

५४७ सत्काम्यानि ।

५४८ आभ्युदयिकार्थान्येव ।

५४९ परानर्थकराणि न चेत् ।

५५० विविधा यज्ञाः ।

५५१ अत्र सफलाःस रहस्याः ।

५५२ तथापि जघन्यान्येव श्रुतेः ।

५५३ पुनःसंधानार्थकानि प्रायश्चित्तानि धर्मलोपे ।

५५४ व्रतादीनि ।

५५५ तान्यपि कर्तव्यानि श्रूयन्ते ।

५५६ तत्समनुष्ठानादात्मगुणोदयः ।

५५७ अध्यात्मभूमिजयश्च ।

५५८ शक्तिविकासश्च ।

५५९ विद्यासामर्थ्यलाभश्च ।

५६० निश्चयबलंच ।

५६१ दयादिरात्मगुणः ।

५६२ आत्मप्रकाशकत्वान्मलापाकरणेन च ।

५६३ मुक्त्युपयोगित्वाच्च ।

५६४ आपदि तु संक्षेपेण यथावकाशम् ।

५६५ यथाशक्ति श्रद्धयाऽऽदरेण च ।

५६६ यथाविधि संध्यावन्दनादपि तु ।

५६७ सावित्रीजपमात्राच्च ।

५६८ अर्थभावनापूर्वं सस्वरमुच्चारणं च जपः ।

५६९ अर्थानुवर्तनं चेत्फलदं शीघ्रम् ।

५७० स्वरज्ञानमूलमर्थज्ञानम् ।

५७१ भावना तन्मूला ।

५७२ नान्यमनस्कश्चेद्दविसत्वं प्रविशति कालेनाऽ
ह्यमलस्यपि ।

५७३ ततो ह्यर्थावबोधो भावनाज्ञानमनुवर्तनमीशा-
नुभवश्च क्रमेण ।

५७४ याथातथ्यतोऽर्थान् पश्यति ततः ।

५७५ उपदिशति च छन्दतः ।

५७६ पदंगृह्णाति श्रोतृमनसि तदुपदेशः ।

५७७ केवलं महायज्ञानुष्ठानाच्चापि हि ।

५७८ देवर्षिपितृनृभूतसेवा च ततः ।

५७९ समाजरक्षा चाश्रमिसत्कारात् ।

५८० सहानुभूतिर्दया चावश्यकी तत्र ।

५८१ भूतमात्रं प्रति च ।

५८२ वृत्तेर्विनिमयोऽपि ।

५८३ अनिन्द्या हीना च न ।

५८४ अनन्तर वर्णाविहिता यावच्छक्यम् ।

५८५ स्वस्मादुच्चवर्णविहिता वा ।

५८६ यावदापत् ।

५८७ यावत्सामर्थ्यलाभोवा ।

५८८ ततस्तत्त्यागः समुचितः ।

५८९ नोचेद्धानिरेव ।

५९० निकृष्टसाम्यापत्तेः ।

५९१ स्वधर्मत्यागात् ।

५९२ परधर्मानुसरणात् ।

५९३ अतो विगुणोऽपि स्वधर्मः श्रेयान् ।

५९४ ततः समत्वाप्ति क्रमशः ।

५९५ स्त्रीपुत्रादिष्वभेदश्च ।

५९६ आत्मरक्षैव परो धर्मः सर्वत्र ।

५९७ वर्णाश्रमधर्माणांमूलभूतश्च ।

५९८ सर्वासामपि नीतिनामाधारभूतः ।

५९९ यावदभेदानुभव आत्मत्वम् ।

६०० समत्वञ्च ।

६०१ निर्दोषत्वञ्चापि ।

६०२ ततस्तत्र सुखप्रतीतिः सार्वजनीना ।

६०३ अनुभूतिरेव सत्यम् ।

६०४ सत्यान्नास्ति परो धर्मः ।

६०५ नानृतात्पातकं परम् ।

६०६ एतदनुरोधेन कर्मयोगानुष्ठानम् ।

६०७ गीतामर्मानुसरणेन च ।

६०८ समाजस्याभिवृद्धिस्ततः ।

६०९ समाजशासनानुवर्तनात् ।

६१० आत्मतत्वजिज्ञासोदयश्च ।

६११ तत्पूर्त्यै वने प्रस्थानम् ।

६१२ विविधाश्चात्र दीक्षा अनुष्ठेयाः ।

६१३ औपनिषद्यो मनोः ।

६१४ वैखानसोक्ताश्च यथाधिकारम् ।

६१५ ब्राह्मण कल्पोक्ता अपि ।

६१६ श्रौतानुसारितन्त्रोक्ताः केषाञ्चित् ।

६१७ ददाति क्षिणोति च दिव्यभावं पापसंचयञ्च ।

६१८ हिंसादीनि पापकर्माणि ।

६१९ अशुभवासनास्तन्मूलानि ।

६२० आसुरीसंपच्च फलम् ।

६२१ अहिंसादीनि शुभकर्माणि ।

६२२ दैवीसंपच्च फलम् ।

६२३ शुभवासना साधनम् ।

६२४ श्रद्धाविवेकपूर्वं गुणभेदज्ञानानुकूलममानित्वाद्यर्जनं क्रमः ।

६२५ दिव्यभावः स एव ।

६२६ ततो ह्यन्वीक्षा जायते ।

६२७ तदभ्यासाच्चात्मसाक्षात्कारः ।

६२८ कर्मफलत्यागात्सः ।

६२९ ध्यानात् ।

६३० ज्ञानात् ।

६३१ चित्तसमाधानात् ।

६३२ तस्मिन्नेव मनःस्थापनात् ।

६३३ एवमनन्ययोगादपि ।

६३४ मंत्रदर्शनमपि ह्यतोऽत्रैव ।

६३५ ग्राम्यभोगवतान्न तत्सिद्धिः ।

६३६ सिद्धिःसंशयनिवृत्तिर्हृदयग्रन्थिभेदश्च ।

६३७ ततो गोत्रप्रवर्तनम् ।

६३८ प्रवराख्यानं वा ।

६३९ कुलपतित्वञ्च ।

६४० आचार्यकुलनिर्वहणमपि ।

६४१ उपाध्यायाऽध्यापकत्वे तदभावे ।
६४२ तत्र द्विजबटूनां शिक्षा चोपयुक्ता ।
६४३ अभ्युदयकारिका ।
६४४ वृत्त्युपयोगिनी ।
६४५ धीविकासिनी ।
६४६ सामर्थ्याधायिका ।
६४७ पारतन्त्र्यापहारिणी ।
६४८ लौकिकेषूपयोगिनी ।
६४९ स्वातन्त्र्याय च ।
६५० स्वाराज्यनिष्ठा ।
६५१ राजभक्तियुक्ता ।
६५२ तदर्थं प्राणादिसमर्पयित्री ।
६५३ चतुर्वर्गदात्र्येव ।
६५४ बृहस्पतिसूक्तानुसारेण ।
६५५ शूद्राणामपीति नीतिविदः ।
६५६ निषादानामपी त्येके ।
६५७ राजपुत्राणां राजधर्मो विशेषतः ।
६५८ व्यवहारदर्शननैपुण्यञ्च ।

६५९ राज्याङ्गोपयोगविधिः ।

६६० नीतिः षड्गुणा ।

६६१ बार्हस्पत्यादिकाः ।

६६२ ततःसार्वात्म्यानुभूतिश्चान्ते ।

६६३ समदृग्भूत्वा सर्वत्र परिव्रजति ततः ।

६६४ स एव श्रेष्ठः कृतकृत्यश्च ।

६६५ अतः फलं संन्यासः ।

६६६ एषणात्रयराहित्यात् ।

६६७ निर्दोषत्वञ्चापि ।

६६८ परमं साम्यञ्चोपैति परस्य ।

६६९ तस्य चातुर्वर्ण्ये भैक्ष्यचर्य्या ।

६७० तस्मिन्शूद्रविट्क्षत्रब्रह्मत्वादिगुणा एकत्राव-
स्थिता विराजीव ।

६७१ अतएव न वर्णी नावर्णी ।

६७२ नाश्रमी नानाश्रमी ।

६७३ अत्याश्रमीत्युच्यते ।

६७४ आचार्य्यःखलु यथार्थः स एव ।

६७५ जगद्गुरुरपि ।

६७६ तस्मिन्सर्वदेवतागुणाश्च श्रुतेः ।

६७७ अनुभवादपि ।

६७८ तत एव फलं यथोक्तम् ।

६७९ वेदविच्च ।

६८० शिष्टतमश्च ।

६८१ ब्रह्मविद्योपदेशोऽस्यमुख्यं कर्म ।

६८२ लोकसंग्रहायवर्णाश्रमधर्मादि ।

६८३ न लोकरञ्जनम् ।

६८४ लोकानुसरणं वा ।

६८५ तल्लोकैषणैव ।

६८६ अथ लोकसंग्रहः ।

६८७ असक्तः कर्मकर्ता श्रीकृष्णवत् ।

६८८ अनुकरणस्वभावत्वाल्लोकस्य बालवत् ।

६८९ कर्मणि युक्तश्च वसिष्ठवत् ।

६९० वेदाध्यापनं व्यासवत् ।

६९१ स्मृतिसंस्कारः पराशरवत् ।

६९२ याज्ञवल्क्यवद्वा ।

६९३ प्रजासंबोधनं मनुवत् ।

६९४ योगज्ञानभक्तिसंजीवनञ्च शङ्करवत् ।

६९५ वर्णाश्रमधर्मसंरक्षणमुज्जीवनञ्च काले विष्णुवत् ।

६९६ सर्वविद्यादेवास्यशास्त्रस्यग्रथनमग्निवेशवत् ।

६९७ संशोधनं संस्करणञ्च चरकवद्वा ।

६९८ संग्रहणं च व्याडिवत् ।

६९९ व्याख्यानञ्च पतञ्जलिवत् ।

७०० यथावदुपदेष्टृत्वं भरतवत्

७०१ वर्णाश्रममर्मरक्षा श्वेतकेतुवत् ।

७०२ पतितानुग्रहश्च विश्वामित्रवत् ।

७०३ धर्मोपदेशो भीष्मवत् ।

७०४ सदःस्थापना शौनकवत् ।

७०५ पदार्थदोहःपृथुवत् ।

७०६ पौरोहित्यं बृहस्पतिवत् ।

७०७ समाजभैषज्यं ब्रह्मवत् ।

७०८ राष्ट्रगुप्तिश्चाणक्यवत् ।

७०९ अग्रणीरग्निवत् ।

७१० अग्निर्ऋषिरिति श्रुतेः ।

७११ समाजोत्पादनं हिरण्यगर्भवत्।

७१२ उपतापे चिकित्सा विष्णुवत्

७१३ समयोचितकृतिरिंद्रवत्।

७१४ प्रजापवनरक्षणं मालाकारवत्।

७१५ कृषिकारवद्वा।

७१६ औषधिरक्षा सोमवत्।

७१७ वित्तगुप्तिः कुवेरवत्।

७१८ अपथ्यहरणं मातृवत्।

७१९ हितकृत्त्वं धरित्रीवत्।

७२० लोकवेदनैपुण्यं पाराशर्यवत्।

७२१ सर्वभूतहितेरतत्वादेवाऽस्य धर्मचक्रप्रवर्तकत्वं चाऽतः।

७२२ स्वार्थत्यागेन च श्रीकृष्णादिवत्।

७२३ बुद्धादिवद्वा।

७२४ दोषं परिज्ञाय हानञ्चरामवत्।

७२५ तत्रापि धर्मोपदेशः सर्वेभ्यो बुद्धवत्।

७२६ दया क्षमा चाप्रतिमा वीरवत्।

७२७ समाजसंग्रथनं नृपवत्।

७२८ अक्षवशीकर्तृत्वं महामदवत् ।

७२९ सत्यार्थे देहत्यागोऽपि क्रीष्टवत् ।

७३० लोकहितं जरदुष्ट्रवत् ।

७३१ यथोदितवर्तनं गौराङ्गवत् ।

७३२ ईशसेवा रामानुजवत् ।

७३३ स्वमताग्रहो मध्ववत् ।

७३४ शुद्धश्चेद्योग्यः ।

७३५ तत्रापि सत्यमेव मदीयमिति ।

७३६ न मदीयमिति सत्यम् ।

७३७ यज्ञमयं जगच्चक्रम् ।

७३८ अतोयज्ञः प्रथमो धर्मः ।

७३९ स्वाभाविक्येव चक्रप्रवृत्तिः ।

७४० तदनुसरणं यथायथम् ।

७४१ उत्पथगानां पथिस्थापनम् ।

७४२ स्वधर्मोद्बोधनं यथाप्रसङ्गम् ।

७४३ परधर्माच्छ्यावनञ्च ।

७४४ साधुपरित्राणम् ।

७४५ अभय प्रदानम् ।

७४६ दुष्कृतविनाशः ।

७४७ चारित्रशुद्धिः ।

७४८ धर्मग्लान्यधर्माभ्युत्थाननिरासश्च ।

७४९ धर्मव्यवस्थापनमपि संशये ।

७५० धर्मयोर्विरोधे निर्णयो यथाशास्त्रम् ।

७५१ नोच्छास्त्रम् ।

७५२ शिष्टमैतिह्यात् ।

७५३ तेन यज्ञमयः पुरुषो यथार्थः ।

७५४ अतोऽर्घ्यः सैव सर्वाहितकृत्वात् ।

७५५ आत्यश्रुतेः ।

७५६ तस्यैव साम्यानुभवः पूर्णः जैगीषव्यवत् ।

७५७ ज्ञानञ्चश्वेताश्वतरादिवत् ।

७५८ अमानित्वादिकं तल्लक्षणम् ।

७५९ तदानीं जीवन्मुक्तः ।

७६० अन्ते विदेहमुक्तो हि ।

७६१ परमानन्दानुभवेन कार्तार्थ्यमन्तः ।

७६२ सैवपरः पुरुषार्थः ।

७६३ शास्त्रादेवाऽस्यावगतिः ।

७६४ तदङ्गकर्तव्यनिश्चितिः ।

७६५ अतः कर्त्तव्यानि कर्तव्यानि ।

७६६ प्रवृत्तिश्चयथायोग्या ।

७६७ प्रवृत्तौ निवृत्तिः ।

७६८ निवृत्तौ प्रवृत्तिः ।

७६९ स्वार्थान्निवृत्तानामपि परार्थे च ।

७७० तत्साधकानि साधनानि साध्यानि ।

७७१ सिद्धानि संरक्षणीयानि ।

७७२ उपदेष्टव्यानि यथाधिकारम् ।

७७३ श्रद्धां संरक्ष्यैव ।

७७४ तन्मूलं हि सदाचारस्य ।

७७५ उत्साहादीनाञ्च ।

७७६ धर्मानुष्ठानस्यापि ।

७७७ विवेकञ्च ।

७७८ ज्ञानोत्पत्तिरतः ।

७७९ फलप्रदत्त्वमुभयोः ।

७८० सत्यस्मानुभूतिश्च ।

७८१ साधनाशुद्धेः साध्याशुद्धिः ।

७८२ अन्नजं मनः ।

७८३ वारिजः प्राणः ।

७८४ तेजसो वाक् ।

७८५ तेषां ईशानुग्रहादेः शुद्धिः ।

७८६ ततोयथावज्ज्ञप्तिः ।

७८७ ततः क्रियाः ।

७८८ सत्यस्यानुभूतिश्च ।

७८९ श्रुतियुक्त्यनुभूतीनामैक्यं चेत्सत्यम् ।

७९० तद्दोषराहित्ये साम्ये च ।

७९१ तदभिलष्यम् परमार्थतः पुरुषार्थसाधकत्वात्

७९२ इति शिवम् ।

७९३ ततः साध्यतान्ततः साध्यताम् ।

इति पुरुषार्थ मीमांसा समाप्ता ।

मुद्रितपुस्तकप्राप्तिस्थानम् ।

श्रीमच्छङ्कराचार्य त्रिविक्रम तीर्थस्वामी ।

(पो० आ०) प्रभासपत्तन ।

(काठियावाड़)

विद्यारत्न पं० हरिप्रसाद शर्मा

खजानागली ।

(पो० आ०) अजमेर ।

(राजपूताना)

पुस्तकेप्सुना प्रेषणव्ययः प्रेषितश्चेत्पत्रेण साकं विनामूल्यं पुस्तकं प्रेषयिष्यते ।

शुभाशंसी—

हरिप्रसाद शर्मा,

(पो० आ० अजमेर)

...श्रीमत्तीर्थस्वामिभी रचिता ग्रन्थाः

मुद्रिताः ।

१ पतितोद्धारमीमांसा (पतितजातिविषयः)
२ पुरुषार्थमीमांसा (दार्शनिकः)

अमुद्रिताः ।

३ तंत्ररहस्यम् (उपासनाविषयकः)
४ रहस्यतंत्रम् (भक्तिविषयकः)
५ योगरहस्यम् (योगविषयकः)
६ प्रायश्चित्ततन्त्रम् (धर्मशास्त्रविषयकः)
७ वंशवृद्ध्यनुशासनम् (आयुर्वेदविषयकः)
८ आत्मरक्षाधर्मसूत्रम् (नीतिग्रन्थः)
९ गीतामर्मानुशासनम् (गीतासारप्रदर्शकः)
१० समाजानुशासनम् (समाजविषयकः)
११ लोकसंग्रहसूत्रम् (आचार्यादीनां कर्तव्यबोधकः)
१२ समाजचिकित्साशास्त्रम् (समाजविषयकोपायबोधकः)
१३ निर्णयानुशासनम् (शास्त्रार्थोपयोगि)
१४ प्रमाणविचारशास्त्रम् (शास्त्रार्थोपयोगि)

अमुद्रितेषु ग्रन्थेषु यस्यकस्यचित् प्रकाशने इच्छा चेदा-चार्यपादानां प्रति पत्रं प्रेषणीयमिति ।

पुस्तक वितरण की तिथि नीचे अङ्कित है। इस तिथि सहित 30 वें दिन तक यह पुस्तक पुस्तकालय में वापिस आ जानी चाहिए। अन्यथा ५ नये पैसे प्रतिदिन के हिसाब से विलम्ब दण्ड लगेगा।

रिद्वार

हुत है।
नय में
दिन के